दिनाङ्क : 31/08/2026 सायम् - 06:20

## आदौ मुख्यवार्ता:

- बिश्केक्-नगरे प्रधानमन्त्रिणा मोदिना ईरान-देशस्य राष्ट्रपतिना मसूद-पेजश्कियानेन सह द्विपक्षीय-वार्ता सम्पादिता, नौपरिवहन-वाणिज्य-स्वातन्त्र्यस्य रक्षणाय कृतम् आह्वानम्, किर्गिज़्-राष्ट्रपतिना आर्मेनिया-प्रधानमन्त्रिणा च सहापि विहितं मेलनम्।
- सर्वकारेण एक-दशमलव-सप्तविंशतिलक्ष-कोटि-रूप्यकाणां परिव्ययेन सेमिकॉन् इण्डिया कार्यक्रमस्य द्वि-दशमलव-शून्यस्य षट्-स्तम्भाः अधिसूचिताः ।
- राष्ट्रपतिपदासीना द्रौपदी-मुर्मुः निफ़्ट्-छात्रान् देशस्य समृद्ध-सांस्कृतिक-न्यासे संलग्नाः सन्तः वैश्विक-दृष्टिकोणम् अङ्गीकर्तुम् आह्वयत् ।
- भारतीय-नौसेनया आईएनएस निपुण इति पोतः सम्मेलितः, अयं तावत् विविधानां निमज्जन-अन्तर्जलीय-कार्याणां सम्पादनाय विशेष-मञ्चरूपेण निर्मितः ।
- नेपाल-देशे विनाशकारि-जलप्लवानन्तरम् आपदुद्धरणकार्याणि तीव्रीभूतानि , मृतानां संख्या त्र्यधिकनवशतं सम्प्राप्ता, चतुस्सहस्राधिकाः जनाः अधुनापि विलुप्ताः ।
- भारतीय-क्रीडकेन अङ्कुर-भट्टाचार्य इत्यनेन चेक-गणराज्ये डब्ल्यूटीटी फीडर् ओलोमौक-स्पर्धायां प्रथमं पुरुष-एकल-विजेतृ-पदम् अर्जितम् ।

## अथ वार्ता: विस्तरेण

### पीएम बिश्केक् यात्रा

बिश्केक्-नगरे किर्गिस्तान्-देशस्य राष्ट्रपतिना सादिर् जापारोव् इत्यनेन सह प्रधानमन्त्रिणः नरेन्द्रमोदिनः उपवेशनं प्रचलति। अवधेयं यत् प्रधानमन्त्री किर्गिस्तान्-देशस्य द्विदिवसीययात्रायाम् अस्ति। इतः पूर्वम्, बिश्केक्-नगरे आयोजिते एस्.सी.ओ. शिखरसम्मेलने इरानदेशस्य राष्ट्रपतिना सह प्रधानमन्त्रिणा श्रीमोदिना द्वैपाक्षिकोपवेशनं कृतम्। उभौ नेतारौ द्वैपाक्षिकसम्बन्धानां विविधपक्षाणां विषये चर्चितवन्तौ। तौ पश्चिम-एशिया-क्षेत्रे सद्यः एव कृतानां विकासानां समीक्षाम् अकुर्वताम्। सर्वे विषयाः संवादस्य कूटनीतेः च माध्यमेन समापनीयाः इति भारतस्य स्थिरस्थितिः प्रधानमन्त्रिणा पुनः प्रतिपादिता। अस्मिन् क्षेत्रे शान्तिं स्थिरतां च सुनिश्चेतुं, नौपरिवहनस्य वाणिज्यस्य च स्वतन्त्रतायाः रक्षणाय च निरन्तरप्रयासानाम् आवश्यकता प्रधानमन्त्रिणा श्रीमोदिना अधोरेखिता। पूर्वं प्रधानमन्त्री मोदी बिश्केक्-नगरे आर्मेनिया-देशस्य प्रधानमन्त्रिणा निकोल् पाशिनयान् इत्यनेन सह मिलितवान्। उभाभ्यां नेतृभ्यां रक्षा, आर्थिकं, औषधनिर्माणं, विज्ञानं तथा प्रौद्योगिकी, संस्कृतिः, शिक्षा इत्यादिषु विविधक्षेत्रेषु द्वैपाक्षिकसहकरणं सुदृढं कर्तुं उपायाः चर्चिताः। तौ पश्चिम-एशियायाः स्थितिं समेत्य क्षेत्रीय-वैश्विक-विकासविषये अपि विचाराणाम् आदानप्रदानम् अकुर्वताम्। कज़ाकिस्तान्-देशस्य राजधान्यां भारतीयसमुदायस्य सदस्यैः सह प्रधानमन्त्री स्नेहपूर्वकं वार्तालापम् अकरोत्। बिश्केक्-नगरस्य महात्मागान्धी-स्मारके अपि श्रीमोदी पुष्पांजलिम् अर्पितवान्। श्वः सः बिश्केक्-नगरे शङ्घाई-सहकार-सङ्घटनस्य षड्विंशतितमं शिखरसम्मेलनं सम्बोधयिष्यति।

### वैष्णव-सेमिकॉन

देशे चिप-निर्माण-पारिस्थितिकी-तन्त्रस्य सुदृढीकरणाय सर्वकारेण अद्य एक-दशमलव-सप्तविंशति-लक्षकोटि-रूप्यकाणां परिव्ययेन सेमिकॉन् द्वि-दशमलव-शून्यं योजना अधिसूचिता। नवदिल्ल्याम् अद्य वार्ताहर-सम्मेलनं सम्बोधयन् केन्द्रीय-इलेक्ट्रॉनिक्स--सूचना-प्रौद्योगिकी-मन्त्री अश्विनी-वैष्णवः अवदत् यत् अनेन उपक्रमेण आगामि-वर्षेषु वैश्विक-अर्धचालक-उद्योगस्य विपणौ भारतस्य सहभागिता प्रायः दश-प्रतिशतं यावत् भवितुमर्हति, अथ च देशः वैश्विक-अर्धचालक-मूल्य-शृङ्खलायां महतीं भूमिकां निर्वक्ष्यति। श्रीवैष्णवः न्यवेदयत् यत् वेफर्-निर्माणतः आरभ्य चिप-उत्पादनं यावत् भारतं वैश्विक-अर्धचालक-मूल्य-शृङ्खलायां दृढतया स्थापयितुं सर्वकारस्य मुख्यं लक्ष्यं वर्तते। अस्य कार्यक्रमस्य षट्-स्तम्भानाम् अधिसूचना प्रकाशयता श्रीवैष्णवेन प्रतिपादितं यत् आगामि-दशकेषु बृहत्-निवेशार्थं भारतम् एव सर्वथा उपयुक्तं गन्तव्य-स्थानम् अस्ति इति वैश्विक-अर्धचालक-हितधारकाणां विश्वासः वर्तते।

### नीफ्ट-दीक्षान्तसमारोहः

राष्ट्रपतिपदासीना द्रौपदी-मुर्मुः अद्य अवदत् यत् वस्त्र-परिधान-क्षेत्रं न केवलं भारतस्य सांस्कृतिक-न्यासस्य महत्त्वपूर्णः भागः अपि तु इदं कोटिशः जनानाम् आजीविकायाः प्रमुखः आधारः अपि वर्तते। राष्ट्रिय-फैशन-प्रौद्योगिकी-संस्थानस्य दीक्षान्त-समारोहं सम्बोधयन्ती राष्ट्रपतिः छात्रान् अभ्यर्थितवती यत् ते देशस्य समृद्ध-सांस्कृतिक-मूल्येषु संलग्नाः सन्तः वैश्विक-दृष्टिकोणम् अङ्गीकुर्वन्तु। फैशन-उद्योगे महिलानां वर्धमानं योगदानं रेखाङ्कयन्ती राष्ट्रपतिः न्यवेदयत् यत् कार्यक्रमे उपस्थितेषु प्रायः चतुःसहस्र-छात्रेषु पञ्चाशीति-प्रतिशतन्मिताः महिलाः सन्ति। सा अकथयत् यत् वस्त्र-प्रौद्योगिकी-क्षेत्रे वैश्विक-उपस्थितेः विस्ताराय भारते असीम-सम्भावनाः वर्तन्ते। राष्ट्रपतिः छात्रान् आह्वयत् यत् ते स्व-ज्ञानस्य, कौशलस्य, सृजनशीलतायाश्च उपयोगेन देशस्य पारम्परिक-वस्त्र-परम्परां समकालिक-विपणिभिः नूतन-प्रौद्योगिकीभिः च सह योजयन्तु।

सप्तचत्त्वारिंशदधिक-द्विसहस्रतमवर्षं यावत् विकसित-भारतस्य सङ्कल्प-पूर्तये युवकानां योगदानम् अधिकृत्य राष्ट्रपतिः अवदत् यत् छात्राः केवलम् उद्योगान्वेषकाः न भवेयुः, अपि तु उद्योग-प्रदातारः भूत्वा अन्येभ्यः अपि वृत्त्यवसरान् सृजेयुः। राष्ट्रपतिः मुर्मुः असूचयत् यत् विगत-चतुर्षु दशकेषु निफ़्ट् इत्यस्य छात्रैः विशेषज्ञैश्च राष्ट्रियान्ताराष्ट्रिय-स्तरे महत्त्वपूर्णाः उपलब्धयः अर्जिताः, येन भारतस्य प्रतिष्ठा प्रवर्धिता। अत्रावसरे केन्द्रीय-वस्त्रमन्त्री गिरिराज-सिंहः अवदत् यत् अष्टोत्तरद्विसहस्रतमे वर्षे तत्कालीनः राष्ट्रपतिः डॉ.ए.पी.जे. अब्दुल-कलामः निफ़्ट्-दीक्षान्त-भाषणं दत्तवान् । अष्टादश-वर्षेभ्यः परं पुनः राष्ट्रपतिः द्रौपदी मुर्मुः छात्रेभ्यः शुभाशीर्वादं प्रदत्तवती। सः अकथयत् यत् अद्य प्रायः चतुस्सहस्रं छात्राः उपाधिपत्राणि प्राप्तवन्तः।

**<u>आईएनएस-निपुणः</u>**

भारतीय-नौसेनया अद्य मुम्बई-नगरस्थे नौसेना-गोदी-प्राङ्गणे निस्तार-वर्गस्य द्वितीयः निमज्जन-सहायक-पोतः आईएनएस निपुण विधिवत् नौसेनायां सम्मेलितः। समारोहं सम्बोधयन् नौसेना-प्रमुखः एडमिरल कृष्ण-स्वामीनाथन् अवदत् यत् रणनीतिक-परिवर्तनस्य अस्मिन् समये, समुद्रे बहुक्षेत्रीय-गम्भीर-जल-अभियानेभ्यः नौसेनायाः विशिष्ट-अन्तर्जलीय-क्षमतासु निपुण इति पोतः एकं सशक्तं संयोजनं भविष्यति। विशाखापत्तनम-स्थितया हिन्दुस्तान शिपयार्ड लिमिटेड इत्यनया संस्थया स्वदेशी-ज्ञानेन परिकल्पितः निर्मितश्च निपुणपोतः निमज्जनस्य अथ च अन्तर्जलीय-अभियानानां विविधानां आवश्यकतानां पूरणाय विशेषतया निर्मितः । अयं पोतः आधुनिक-निमज्जन-प्रणालीभिः अन्तर्जलीय-हस्तक्षेप-सामर्थ्यैश्च सज्जः अस्ति, येन समुद्रे कठिन-परिस्थितिषु कार्यरतानां निमज्जकानां कृते निरन्तरं साहाय्यं सम्भविष्यति। पोते नौपरिवहनस्य, मञ्च-प्रबन्धनस्य अत्याधुनिक-प्रणालीभिः सह निमज्जनाय, अन्तर्जलीय-कार्याय, चिकित्सा-साहायतायै च विशिष्टाः सुविधाः अन्तर्भूताः सन्ति।

**<u>नेपाल बाढ</u>**

नेपालदेशे गतसप्ताहे विनाशकारि-जलाप्लावेन, मृत्तिका-स्खलनेन च मृतानां सङ्ख्या त्र्यधिकनवशतं यावत् वर्धिता, प्रायः सपादचतुःसहस्रतोऽप्यधिकाः जनाः विलुप्ताः एव सन्ति। नेपाल-देशस्य राष्ट्रिय-आपद्-सङ्कट-न्यूनीकरण-प्रबन्धन-प्राधिकरणस्य अनुसारं रविवासरात् एषा सङ्ख्या वर्धिता अस्ति। नेपालदेशस्य अष्टप्रभावितमण्डलेभ्यः शवाः प्राप्ताः , रक्षकाः लुप्तान् अन्वेष्टुं, रक्षयितुं च लग्नाः सन्ति। अत्रान्तरे, प्रायः विभिन्नासु जलविद्युत्-परियोजनासु न्यूनातिन्यूनं त्रयस्त्रिंशदुत्तरनवशतं यावत् कर्मकराः बाधिताः इति मन्यते। तिब्बत-क्षेत्रे सम्प्रति मृतकानां सङ्ख्या षोडश अस्ति, षड् चत्वारिंशदुत्तरपञ्चशतं यावत् जनाः लुप्ताः सन्ति इति उच्यते। अनया आपदया नेपाल-तिब्बत-सीमायां स्थितेषु नगरेषु ग्रामेषु च हिमस्य, शिलायाः, मृत्तिकायाः, भग्नावशेषस्य च प्रवाहः आगतः। नेपाली-प्रधानमन्त्री बालेन्द्रशाहः जलाप्लावनं "अभूतपूर्वं विनाशकरं च प्राकृतिक-आपत्" इति उक्तवान्, यत्र प्रायः एकविंशति सहस्रं यावत् सुरक्षा-कर्मचारिणः उद्धारकार्ये संलग्नाः आसन्। रेड्क्रास्-संस्थायाः अनुसारं नवति सहस्रतोऽप्यधिकाः जनाः प्रभाविताः इति अनुमानम् अस्ति, यदा तु अधिकारिणः शवानाम् अन्वेषणम्, अभिज्ञानम् च निरन्तरं कुर्वन्तः सन्ति।

**<u>टेबल टेनिस</u>**

भारतीयः टेबल टेनिस क्रीडकः अंकुर भट्टाचार्जी इत्येषः चेक रिपब्लिक इत्यत्र WTT फीडर ओलोमौक स्पर्धायां स्वस्य प्रथमं WTT पुरुषैकल उपाधिं विजितवान।

**।। इति वार्ताः ।।**